Airo International Research Journal
Volume XV, ISSN: 2320-3714
January, 2018
Impact Factor 0.75 to 3.19
UGC Approval Number 63012

# वेदम नीहितं जीवन: रहस्य:

Gunjan Yadav M.Phil student MDU Rohtak
Dr. Asha Professor MDU Rohtak

**सार:**

चत्वारः वेदाः भवन्ति। ऋग्वेदः , यजुर्वेदः, सामवेदः, अथर्ववेदश्चेति एकैकस्यापि संहिता, ब्राह्मणम्, आरण्यकम्, उपनिषत् इत्येवं विभागाः सन्ति। वेदाः उत्कृष्टाः साहित्यकृतयः भवन्ति। तानि च सूक्तानि प्रतिभावतांऋषीणां योगदानानि भवन्ति। एकैकस्यापि सूक्तस्य ऋषिः , छन्दः, देवता इति त्रितयमस्ति।संस्कृतसाहित्ये वेदानां स्थानं सर्वोपरि वर्त्तते। भारते धर्मव्यवस्था वेदायत्तैव।

वेदो धर्मनिरूपणे स्वतन्त्रभावनप्रमाणम् , स्मृत्यादयस्तु तन्मूलकतया। श्रुतिस्मृत्योर्विरोधे श्रुतिरेव गरीयसी। न केवलं धर्ममूलतयैव वेदाः समादृताः, अपि तु विश्वस्मिन् सर्वप्राचीनग्रन्थतयाऽपि।

**प्रस्तावना**

प्राचीनानि धर्मसमाज –व्यवहारप्रभृतीनि वस्तुजातानि बोधयितुं श्रुतय एव क्षमन्ते ।प्रधानतया वेदो द्विविधः मन्त्ररूपो ब्राह्मणरूपश्च । मन्त्रसमुदाय एव संहिताशब्देन व्यवहृतः । ब्राह्मणरूपो वेदभागस्तु संहिताभागस्य व्याख्यारूप एव ।

स चायं ब्राह्मणभागो यागस्वरूपबोधकतया वैदिकविधिप्रयोगविवरणया च प्रथितः । ब्राह्मणग्रन्थोऽपि त्रिधा विभक्तो भवति- ब्राह्मणम् , आरण्यकम् उपनिषदश्च । यज्ञस्वरूपप्रतिपादको ब्राह्मणभागः । अरण्ये पठिताः यज्ञस्याध्यात्मिकं रूपं विवेचयन्तो वेदभाग आरण्यकानि । उपनिषदो ब्रह्मबोधिकाः मोक्षसाधनानि , अयमेव भागो वेदस्यान्तरूपतया वेदान्त इत्युच्यते । ब्राह्मणभागो गृहस्थानामुपयोगी , आरण्यकभागो वानप्रस्थमाश्रितानाम्, उपनिषद्भागश्च संन्यस्तानामुपयोगीत्यपि कथयितुं शक्यते ।

ऋच्यते स्तूयते यया सा ऋक् । तादृशीनामृचां समूह एव ऋग्वेदः । यत्रार्थवशेन पादव्यवस्था सा ऋगिति मीमांसकाः । स ऋग्वेदः सूक्तमण्डलभेदेन द्विधा विभक्तः । तत्र सूक्तं चतुर्विधम्-ऋषिसूक्तदेवतासूक्तच्छन्दः सूक्तहोऽर्थसूक्तभेदात् । एकर्षिदृष्टमन्त्राणां समूहो ऋषिसूक्तम् । एकदेवताकमन्त्राणां समूहो देवतासूक्तम् । समानछन्दसां मन्त्राणां समूहो नामच्छन्दः सूक्तम् । यावदर्थसमाप्तानां मन्त्राणां समूहोऽर्थसूक्तम् । सुष्टूक्तत्वात्सर्वं सूक्तमित्याख्यायते ।ऋग्वेदः सोऽयं मण्डलानुवाकवर्गभेदेन अष्टकाध्यायसूक्तभेदेन च द्विधा । बालखिल्यसूक्तानि विहाय सम्पूर्णायामृग्वेदसंहितायां दशमण्डलानि , पञ्चाशीतिश्चानुवाकाः, अष्टोत्तरशतद्वयमिताश्च वर्गाः (इति प्रथमो भेदः) अष्टौ अष्टकानि , चतुष्षाष्टिरध्यायाः, सप्तदशोत्तरसहस्राणि च सूक्तानि (इति द्वितीयो भेदमार्गः)।

मन्त्राश्च सर्वे दशसहस्त्रचतुः शतसप्तषष्ठिमिताः (१०४६७) इति शाकलः , शौनकानुक्रमणी तु दशसहस्रपञ्चाशतशीतिमितान् (१०५८०) मन्त्रान् आह ।

अत्र भेदे कालभेदेन मन्त्रवृध्दिलोपावेव हेतुतयोन्नेयौ भवतः । शब्दसंख्या - १५३८२६, अक्षरसंख्या -४३२००० । सर्वेऽपि मन्त्राः चतुर्दशसु छन्दस्सु विभक्ता बोध्याः ।

ऋग्वेदगतमन्त्रद्रष्टारो ऋषयःत्समदविश्र्वामित्रवामदेवात्रिभ रद्वाजवसिष्ठादयः सन्ति । ऋग्वेदस्य दशसु मण्डलेषु नवमं मण्डलं पवमानमण्डलनाम्ना प्रथितम् । तत्र हि सोमविषयकमन्त्राणां सङ्कलनं कृतम् । पवमानः – सोमः । पूर्वोक्ताः सप्तापि मन्त्रद्रष्टारो ऋषयो द्वितीयमण्डलतः सप्तमण्डलपर्यन्तगताभिः ऋग्भिः सम्बद्धाः, दशममण्डले मन्त्रा नानर्षिसम्ब द्धाः । दशमे मण्डले न केवलं देवतास्तुतय एव, अन्यप्रकारका अपि मन्त्राः दृश्यन्ते ।

**वेदम नीहितं जीवनः रहस्यः**

*सहस्त्रहशीर्षा पुरूषः सह ‌ ऽक्षः सह ‌ ऽपात्।*

*स भूमिं विश्वतों वृत्वात्यतिष्ठद्दशाङ्गुलम्।पुरूष एवेदं सर्वं यद्भूतं यच्च भाव्यम्।उतामृतत्वस्येशानो यदन्नेनातिरोहति।*

पुरूष-एव-इदम्-सर्वम्-यत्-भूतम्-यत्-च-भाव्यम्-उत-अमृतत्वस्य-इशानः-त्-अन्नेन-अतिरोहति *एतावानस्य महिमातो ज्यायाँश्च पुरूषः।*

*पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि।।* एतावान्-अस्य-महिमा-अतः-ज्यायान्-च-पुरूषः-पादः-अस्य-विश्वा-भूतानि-त्रि-पाद्-अस्य-अमृतम्-दिवि *पादूर्ध्व उदैत्पुरूषः पादोऽस्येहाभवत्पुनः।*

*ततो विष्व ङ्व्यक्रामत्साशनानशने अभि।।* त्रि-पाद-ऊर्ध्वः-उदैत्-पुरूषः-पादः-अस्य-इह-अभवत्-पूनः-ततः-विश्वङ्व्यक्रामत्-सः-अशनानशने-अभि

*तस्माद्विराळजायत विराजो अधि पूरूषः।*

*स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः।।* तस्मात्-विराट्-अजायत-विराजः-अधि-पुरूषः-स-जातः-अत्यरिच्यत-पश्चात्-भूमिम्-अथः-पुरः।

*सप्तास्यासन्परिधयस्त्रिाः सप्त समिधः कृताः।*

*देवा यद्यज्ञं तन्वाना अबध्नन्पुरूषं पशुम्।।* सप्त-अस्य-आसन्-परिधयः-त्रिसप्त-समिधः-कृताः-देवा-यत्-यज्ञम्-तन्वानाः- अबध्नन्-पुरूषम्-पशुम्।

*यज्ञेन यज्ञमयजन्त देवास्त्तानि धर्माणि प्रथमान्यासन्।*

*ते ह नाकं महिमानः सचन्त यत्रा पूर्वे साध्याः सन्ति देवाः।।* यज्ञेन-यज्ञम्-अ-यजन्त-देवाः-तानि-धर्माणि-प्रथमानि-आसन्-ते-ह्-नाकम्- महिमानः- सचन्त-यत्रा-पूर्वे-साध्याः-सन्ति देवाः।

*ब्रह्म जज्ञानं प्रथमं पुरस्त्ताद् वि सीमतः सुरुचो वेन आवः।*

*स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च वि वः।।*

*ब्रह्म-ज-ज्ञानम्-प्रथमम्-पुरस्त्तात्-विसिमतः-सुरुचः-वेनः-आवः-सः-बुध्न्याः -उपमा-अस्य-विष्ठाः-सतः-च-योनिम्-असतः-च-वि वःइयं पित्रया राष्ट्र î ेत्वग्रे प्रथमाय जनुषे भुवनेष्ठाः।*

*तस्मा एतं सुरुचं ह्नारमह्यं घर्मं श्रीणन्तु प्रथमाय धास्यवे।।*

*इयम्-पित्रया-राष्ट्रि-एतु-अग्रे-प्रथमाय-जनुषे-भुवनेष्ठाः-तस्मा-एतम्-सुरुचम्ह्वारमह्यम्-धर्मम्-श्रीणान्तु-प्रथमाय-धास्यवे यो जज्ञे विद्वानस्य बन्धुर्विश्वा देवानां जनिमा विवक्ति।*

*ब्रह्म ब्रह्मण उज्जभार मध्यान्नीचैरुच्चैः स्वधा अभि प्र तस्थौ।।*

*प्र-यः-जज्ञे-विद्वानस्य-बन्धुः-विश्वा-देवानाम्-जनिमा-विवक्ति-ब्रह्मः-ब्रह्मणः-उज्जभार-मध्यात्-निचैः-उच्चैः-स्वधा-अभिः-प्रतस्थौसः हि दिवः सः पृथिव्या*

*ऋतस्था मही क्षेमं रोदसी अस्कभायत्।*

*महान् मही अस्कभायद् वि जातो द्यां सप्र पार्थिवं च रजः।।*

*सः-हि-दिवः-स-पृथिव्या-ऋतस्था-मही-क्षेमम्-रोदसी-अकस्भायत्-महान् -मही-अस्कभायद्-विजातः-धाम्-सदम्-पार्थिवम्-च-रजः*

*सः बुध्र्यादाष्ट्र जनुषोऽभ्यग्रं बृहस्पतिर्देवता तस्य सम्राट्।*

*अहर्यच्छुक्रं ज्योतिषो जनिष्टाथ द्युमन्तो वि वसन्तु विप्राः।।*

*सः-बुध्र्यात्-आष्ट्र-जनुषेः-अभि-अग्रम्-बृहस्पतिः-देवता-तस्य-सम्राट-अहः- यत्-शुक्रम्-ज्योतिषः-जनिष्ट-अथ-द्युमन्तः-वि-वसन्तु-विप्राःनूनं तदस्य काव्यो*

*हिनोति महो देवस्य पूर्व्यस्य धाम।*

*एष जज्ञे बहुभिः साकमित्था पूर्वे अर्धे विषिते ससन् नु।।*

नूनम्-तत्-अस्य-काव्यः-महः-देवस्य-पूव्र्यस्य-धाम-हिनोति-पूर्वे-विषिते-एष-जज्ञे-बहुभिः-साकम्-इत्था-अर्धे-ससन्-नु। *योऽथर्वाणं पित्तरं देवबन्धुं बृहस्पतिं नमसाव च गच्छात्।त्वं विश्वेषां जनिता यथासः कविर्देवो न दभायत् स्वधावान्।।*यः-अथर्वाणम्-पित्तरम्-देवबन्धुम्-बृहस्पतिम्-नमसा-अव-च-गच्छात्-त्वम्-विश्वेषाम्-निता-यथा-सः-कविर्देवः-न-दभायत्-स्वधावान्

*ऊध्र्वमूलम्, अधःशाखम्, अश्वत्थम्, प्राहुः, अव्ययम्, छन्दांसि, यस्य, पर्णानि, यः, तम्, वेद, सः, वेदवित्।।अधः, च, ऊध्र्वम्, प्रसृताः, तस्य, शाखाः, गुणप्रवृद्धाः, विषयप्रवालाः, अधः, च, मूलानि, अनुसन्ततानि, कर्मानुबन्धीनि, मनुष्यलोके।।*

*न, रूपम्, अस्य, इह, तथा, उपलभ्यते, न, अन्तः, न, च, आदिः, न, च, सम्प्रतिष्ठा, अश्वत्थम्, एनम्, सुविरूढमूलम्, असंगशस्त्रोण, दृढेन, छित्वा।। ततः, पदम्, तत्, परिमार्गितव्यम्, यस्मिन्, गताः, न, निवर्तन्ति, भूयः, तम्, एव्, च, आद्यम्, पुरुषम्, प्रपद्ये, यतः, प्रवृतिः, प्रसृता, पुराणी।।*

Airo International Research Journal
Volume XV, ISSN: 2320-3714
January, 2018
Impact Factor 0.75 to 3.19
UGC Approval Number 63012

## *निष्कर्ष:*

*द्वौ, इमौ, पुरुषौ, लोके, क्षरः, च, अक्षरः, एव, च, क्षरः, सर्वाणि, भूतानि, कूटस्थः, अक्षरः, उच्यते।।उत्तमः, पुरुषः, तु, अन्यः, परमात्मा, इति, उदाहृतः, यः, लोकत्रायम् आविश्य, बिभर्ति, अव्ययः, ईश्वरः।।ब्रह्मा - अहम् ईश्वरः किल ते प्रभावात्सर्वे वयं जनि युता न यदा तू नित्याः , के अन्ये सुराः शतमख प्रमुखाः च नित्या नित्या त्वमेव जननी प्रकृतिः पुराणा।यदि दयार्द्रमना न सदांऽबिके कथमहं विहितः च तमोगुणः कमलजश्च रजोगुणसंभवः सुविहितः किमु सत्वगुणों हरिः।*

**सन्दर्भ:**


- ऋग्वेद: , काशी संस्कृत ग्रंथमाला , वाराणसी, २०१०
- ऋग्वेद: , स्वाध्याय मंडल , मुंबई, २०१२
- ऋग्वेद: , दिव्या ज्योति , मुंबई, २०१३

Airo International Research Journal
Volume XV, ISSN: 2320-3714
January, 2018
Impact Factor 0.75 to 3.19
UGC Approval Number 63012